णिश, ध्याने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) ध्याने समाधौ । नेशति योगी । निनि-शतुः । इति दुर्गादासः ॥

णिष, उ सेके । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-सकं-सेट् । उदित्वात् क्त्वावेट् ।) उ, नेषित्वा निष्ट्वा । इति दुर्गादासः ॥

णिस, इ ङ ल चुम्बने । इति कविकल्पद्रुमः ॥ (अदां-आत्मं-सकं-सेट् ।) ल ङ, निंस्ते । इ, निंस्यते । इति दुर्गादासः ॥

णी, ञ प्रापणे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-द्विकं-अनिट् ।) वोपदेशपाठे णादित्वेन प्राप्तन्न इति णत्वार्थः । प्रणयति । एवं सर्व्वत्र । प्रापणमिह प्राप्त्यस्य रूपम् । तथा च । गृह्णाति लम्भयति च वेदत्वपि नयत्यम् । इति क्रिया-निर्घण्टः ॥ ञ, नयति नयते गां वनं गोपः प्रापय-तीत्यर्थः । इति दुर्गादासः ॥

णील, वर्णे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सकं च-सेट् ।) वर्ण इह रूपावर्णभावलत्-करणञ्च । नीलति पत्रं तमालस्य । नीलति वस्त्रं तन्तुवायः । इति दुर्गादासः ॥

णीव, स्थौल्ये । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-सेट् ।) नीवति लोकः स्थूलः स्यादित्यर्थः । इति दुर्गादासः ॥

णु, ल स्तुतौ । इति कविकल्पद्रुमः ॥ ( अदां-परं-सकं-सेट् ।) ल, नौति । इति दुर्गादासः ॥

णुद, ञ श औ प्रेरणे । इति कविकल्पद्रुमः ॥ (तुदां-उभं-सकं-अनिट् ।) ञ श, नुदति नुदते शरं योधः । औ, नोत्ता । इति दुर्गादासः ॥

णू, षि स्तवने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) दीर्घान्तोऽयमिति वररुचिः । शि, नुवति । अनुवीत् । इति दुर्गादासः ॥

णेद, ऋ ञ सन्निधौ । कुत्सने । इति कविकल्पद्रुमः ॥ ( भ्वां-उभं-अकं-सकं च-सेट् ।) सन्निधिः सन्नि-कर्षः । ऋ, अनिनेदत् । ञ, नेदति नेदते दयालुं दीनः । निनेदुः । इति दुर्गादासः ॥

णेष, ऋ ङ गतौ । इति कविकल्पद्रुमः ॥ ( भ्वां-आत्मं-सकं-सेट् ।) ऋ, अनिनेषत् । ङ, नेषते निनेषे । गतौ गतिः । इति दुर्गादासः ॥ * ॥ एते धातवः खभावतो दन्त्यनादयो वोपदेशेन मूर्द्धन्यणादाः ॥

---

## त

त, तकारः । स व्यञ्जनषोड़शवर्णः । तवर्गप्रथम-वर्णश्च । ( अर्द्धमात्राकालेनोच्चार्य्यः । ) अस्यो-च्चारणस्थानं दन्तः । इति व्याकरणम् ॥ (अस्यो-च्चारणे दन्तमूलेन जिह्वाग्रस्य स्पर्शः आभ्य-न्तरप्रयत्नः । विवारश्वासघोषाः बाह्यप्रयत्नाः । मातृकान्यासेऽस्य वामस्फिचि न्यासक्रिया स्यात् । ) वङ्गीयवर्णमालायां तस्य लेखनप्रकारो यथा,—

“आदौ बिन्दुस्ततो मध्ये कुण्डलीत्वमवाप्य वा ।
दक्षाद्वामगता नित्या शक्तिविष्णुशिवरूपिणी ॥
ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने ! ।
चतुर्भुजां महाशान्तां महामोक्षप्रदायिनीम् ॥
सदा षोड़शवर्षीयां रक्ताम्बरधरां पराम् ।
नानालङ्कारभूषां वा सर्व्वसिद्धिप्रदायिनीम् ॥
एवं ध्यात्वा तकारन्तु तन्मन्त्रं दशधा जपेत् ॥”
इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
“तकारं चञ्चलापाङ्गि ! स्वयं परमकुण्डली ।
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा ॥
त्रिशक्तिसहितं वर्णं आत्मादितत्त्वसंयुतम् ।
त्रिबिन्दुसहितं वर्णं पीतविद्युत्समप्रभम् ॥”
तस्य १९ शाब्दिकनामानि यथा,—
“तः पूतना हरिः शुद्धिः शक्ती शक्तिर्जटी स्वधा ।
वामस्फिक्वामकट्यौ च कामिनी मध्यकर्णकः ॥
आषाढ़ी तक्षकस्तत्र कामिका एकपुच्छकः ।
रत्नकश्च क्षमासूक्ष्मौ वाराहो मकरोऽब्धया ॥
सुगतोऽर्द्धसंख्या सुरनाशश्च क्रोड़पुच्छकः ।
गन्धो विन्ध्यमदयन्त्रवाङ्गुरामा च वीरकः ॥
जयन्तिपुलको वामितरङ्गमदनातुरा ॥”
इति नानातन्त्रशास्त्रम् ॥

तं, क्ली क्ली, ( तॄ + भावे डः । ) तरणम् । (तरति भवसागरमनेनेति । तॄ + करणे डः ।) पुण्यम् । इति मेदिनी । ते, १ ॥

तः, पुं, ( तर्द्दति तर्म्मति वा हिनस्ति श्वादिस्वर-वेन धनानिति । तर्द्द तर्म्म वा + डः । ) चौरः । अमृतम् । पुच्छम् । क्रोड़ः । म्लेच्छः । इति मेदिनी । ते, १ ॥ गर्भः । शठः । इति शब्दरत्ना-वली ॥ रत्नम् । सुगतः । योधः । नौरविमर्द्दित-पुच्छम् । क्रोडपुच्छम् । इत्येकाक्षरकोषः ॥

तक, सहने । हासे । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-सकं-हासे अकं-सेट् ) तकति । इति दुर्गा-दासः ॥

तक, इ दौर्गत्ये । इति कविकल्पद्रुमः ( भ्वां-परं-अकं-सेट् ।) दौर्गत्यं दुःखेन जीवनम् । इ, तङ्क्यते दरिद्रेण दुःखेन जीव्यते इत्यर्थः । तङ्कति दीनः दुःखेन जीवति इत्यर्थः । इति दुर्गादासः ॥

तकिलः, त्रि, ( तक् + “मिथिलादयश्च ।” उणां । १ । ५६ । इति इलच् नलोपश्च । ) धूर्त्तः । इत्युणादिकोषः ॥

तकिला, स्त्री, ( तकिल + टाप् । ) औषधम् । इत्युणादिकोषः ॥

तक्यः, त्रि, ( तकं हासमर्हतीति । तक + यत् । ) हास्यः । ( तक सहने + “तकिशसि चतियति जनिभ्यो यद्वाच्यः ।” ६ । ४ । ६५ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या यत् । ) सहनीयः ॥

तक्रं, क्ली, ( तनक्ति सङ्कोचयति दुग्धं पादाम्बु-दधिरूपेण परिणमयतीत्यर्थः । “स्फायितञ्चीति ।” उणां । २ । १३ । इति रक् न्यङ्क्वादित्वात् कुत्वं च ।) पादाम्बुसंयुतदधि । इत्यमरः ।२।९।५३॥
तत्पर्य्यायः । गोरसजम् २ घोलम् ३ काल-शेयम् ४ विलोड़ितम् ५ दण्डाहतम् ६ अरि-ष्टम् ७ यज्ञम् ८ उदश्वित् ९ मथितम् १० रसः ११ । इति राजनिर्घण्टः ॥ तत् पञ्च-विधम् । तेषां भिन्नानि नामानि लक्षणानि च यथा,—

“ससरं निर्ज्जलं घोलं मथितं त्वसरोदकम् ।
तक्रं पादजलं प्रोक्तमुदश्विदर्द्धवारिकम् ॥
छच्छिका सरहीनं स्यादच्छा प्रचुरवारिका ॥”
तेषां गुणाः ।
“वातपित्तहरं घोलं मथितं कफपित्तनुत् ।
तक्रं ग्राहि कषायाम्लं स्वादुपाकरसं लघु ॥
वीर्य्योष्णं दीपनं वृष्यं प्रीणनं वातनाशनम् ।
ग्रहण्यादिमतां पथ्यं भवेत् संग्राहि लाघवात् ॥
किञ्च स्वादु विपाकित्वान्न च पित्तप्रकोपणम् ।
कषायोष्णविकाशित्वाद्रौक्ष्याच्चापि कफापहम् ॥
न तक्रसेवी व्यथते कदाचि-
न्न तक्रदग्धाः प्रभवन्ति रोगाः ।
यथा सुराणाममृतं सुखाय
तथा नराणां भुवि तक्रमाहुः ॥
उदश्वित् कफकृद्बल्यं श्रमघ्नं परमं मतम् ।
छच्छिका शीतला लघ्वी पित्तश्रमतृषाहरी ॥
वातनुत् कफकृत् सा तु दीपनी लवणान्विता ॥”
अथोद्धृतस्नेहतक्रोकोद्धृतस्नेहताद्धृतस्नेहतानां तक्राणां गुणाः ।
“समुद्धृतं हितं तक्रं पथ्यं लघु विशेषतः ।
स्तोकोद्धृतस्नेहं तस्माद्गुरु वृष्यं कफापहम् ॥
अनुद्धृतस्नेहं सान्द्रं गुरु पुष्टिकफप्रदम् ॥” *॥
अथ दोषविशेषे व्याधिविशेषे च तक्र-विशेषाः ।
“वातेऽम्लं शस्यते तक्रं शुण्ठीसैन्धवसंयुतम् ।
पित्ते स्वादुसितायुक्तं सव्योषमदृषं कफे ॥
हिङ्गुजीरयुतं घोलं सैन्धवेन च संयुतम् ।
भवेदतीव वातघ्नमर्शोऽतीसारहृत् परम् ॥
रुचिदं पुष्टिदं बल्यं वस्तिशूलविनाशनम् ।
मूत्रकृच्छ्रे तु सगुड़ं पाण्डुरोगे सचित्रकम् ॥” *॥
अथामपक्वतक्रगुणाः ।
“तक्रमामं कफं कोष्ठे हन्ति कण्ठं करोति च ।
पीनसश्वासकासादौ पक्वमेव प्रयुज्यते ॥” *॥
अथ तक्रसेवननिमित्तानि ।
“शीतकालेऽग्निमान्द्ये च तथा वातामयेषु च ।
अरुचौ स्रोतसां रोधे तक्रं स्यादमृतोपमम् ॥
तत्तु हन्ति गरच्छर्द्दिप्रसेकविषमज्वरान् ।
पाण्डुमेदोग्रहण्यर्शोमूत्रग्रहभगन्दरान् ॥
मेहं गुल्ममतीसारं शूलप्लीहोदरारुचीः ।
श्वित्रकोठव्रणशोथान् कुष्ठशोथतृषाकृमीन् ॥”
अथातक्रविषयाः ।
“नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्बले ।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके ॥” *॥
अथ गव्यादीनां तक्राणां विशिष्टगुणाः ।
“यावन्त्यानि दधीन्यत्र तद्गुणं तक्रमादिशेत् ॥”
इति भावप्रकाशः ॥